



॥ शारदापाण्यवलम्बनस्तुतिः ॥

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीसच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

विरचिता ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रिता ।

१९०८.

Copyright Registered.



॥ श्रीः ॥

॥ शारदापाण्यवलम्बनस्तुतिः ॥

जाड्यवारिधिनिमग्नसुबुद्धे-
र्जातरूपसदृशच्छविकाये ।
वासवादिदिविषत्प्रवरेड्ये
वाणि देहि मम पाण्यवलम्बम् ॥ १ ॥

पाणिनिर्जितसरोरुहगर्वे
पारदे विविधदुःखपयोधेः ।
वासनाविरहितैर्लघुलभ्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २ ॥

शारदाभ्रसदृशाम्बरवीते
नारदादिमुनिचिन्तितपादे ।
नीलनीरदसदृक्कचभारे
वाणि देहि मम पाण्यवलम्बम् ॥ ३ ॥

यत्पदाम्बुरुहपूजकवक्त्रा-
दाशु निःसरति वागनवद्या ।
स्वर्धुनीहिमगिरेरिव सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ४ ॥

जातुचित्प्रणमतोऽपि पदाब्जे
देवराजसदृशान् प्रकरोषि ।
यत्तदम्ब चरणौ तव वन्दे
वाणि देहि मम पाण्यवलम्बम् ॥ ५ ॥

शान्तिदान्तिमुखसाधनयुक्ते-
र्वेदशीर्षपरिशीलनसक्तैः ।
आदरादहरहः परिसेव्ये
वाणि देहि मम पाण्यवलम्बम् ॥ ६ ॥

कोशपञ्चकनिषेधनपूर्वं
क्लेशपञ्चकमपि प्रविहाय ।
यां प्रपश्यति यतिर्हृदि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ७ ॥

वन्द्यमानचरणे सुरबृन्दै-
र्गीयमानचरिते तुरगास्यैः ।
जप्यमाननिजनाम्नि मुनीन्द्रै-
र्वाणि देहि मम पाण्यवलम्बम् ॥ ८ ॥

संनिरीक्ष्य कमलानि यदङ्घ्री-
साम्यमाप्तुमनयोस्तपसाम्भः ।
कण्ठदघ्नमधिजग्मुरसौ सा
वाणि देहि मम पाण्यवलम्बम् ॥ ९ ॥

पुण्यमम्ब न कृतं मतिपूर्वं
पापमेव रचितं त्वतियत्नात् ।
तेन तप्तमनिशं हृदयाब्जं
वाणि देहि मम पाण्यवलम्बम् ॥ १० ॥

नाहमम्ब सरसां च सुवर्णा-
मातनोमि कवितां विविधार्थाम् ।
केन पूजयति मां भुवि लोको
वाणि देहि मम पाण्यवलम्बम् ॥ ११ ॥

अक्षपादकणभुक्फणिनाथैः
देवहूतिसुतजैमिनिमुख्यैः ।
प्रोक्तशास्त्रनिचयेन हि बुद्धिः
वाणि देहि मम पाण्यवलम्बम् ॥ १२ ॥

नैव पादसरसीरुहयोस्ते
पूजनं प्रतिदिनं प्रकरोमि ।
हेतुशून्यकरुणाजनिभूमे
वाणि देहि मम पाण्यवलम्बम् ॥ १३ ॥

संनिरुद्ध्य हृदयाम्बुजमध्ये
स्वान्तमम्ब तव सुन्दरमूर्तेः ।
ध्यानमप्यनुदिनं न हि कुर्वे
वाणि देहि मम पाण्यवलम्बम् ॥ १४ ॥

दुःखजन्मवसुधा विषया
इत्यादरेण गुरुभिः श्रुतिशीर्षैः ।
बोधितोऽपि न हि यामि विरक्तिं
वाणि देहि मम पाण्यवलम्बम् ॥ १५ ॥

पुत्रमित्रगृहदारजनन्यो
भ्रातृबन्धुधनभृत्यमुखा वा ।
नैव कालवशगस्य सहाया
वाणि देहि मम पाण्यवलम्बम् ॥ १६ ॥

एकमेव सदबाधितमन्य-
त्तुच्छमित्यसकृदागमशीर्षम् ।
वक्त्यथापि न निवृत्तिरनित्यात्
वाणि देहि मम पाण्यवलम्बम् ॥ १७ ॥

जन्ममृत्युमयनीरधिमध्ये
मज्जतो विविधरुङ्मकराढ्ये ।
पश्यतोऽपि न हि भीतिरनेकान्
वाणि देहि मम पाण्यवलम्बम् ॥ १८ ॥

त्वत्पदाम्बुरुहयुग्ममपास्य
प्राक्तनाघपरिमार्जनदक्षम् ।
नास्ति तारणविधानसमर्थं
वाणि देहि मम पाण्यवलम्बम् ॥ १९ ॥

बालचन्द्रपरिचुम्बितशीर्षे
बाहुसक्तकनकाङ्गदरम्ये ।
कण्ठलोलवरमौक्तिकहारे
वाणि देहि मम पाण्यवलम्बम् ॥ २० ॥

आननेन चरणेन कटाक्षै-
र्नीरजासनमनोहरकान्ते ।
चन्द्रमम्बुजमलिं च हसन्ती
वाणि देहि मम पाण्यवलम्बम् ॥ २१ ॥

मध्यनिर्जितमृगाधिपगर्वे
मत्तवारणसदृग्गतिशीले ।
मञ्जुशिञ्जितमहाभरणाढ्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २२ ॥

तापमम्ब विनिवार्य समस्तं
पापमप्यहरहः कृतमाशु ।
चित्तशुद्धिमचिरात्कुरु मातः
वाणि देहि मम पाण्यवलम्बम् ॥ २३ ॥

पादपद्मयुगमर्दनरूपा
पात्रवस्त्रपरिशुद्धिमुखा वा ।
श्रीगुरोर्न हि कृता बत सेवा
वाणि देहि मम पाण्यवलम्बम् ॥ २४ ॥

मन्त्रराजलयपूर्वकयोगान्
योगिनीहृदयमुख्यसुतन्त्रान् ।
नैव वेद्मि करुणामृतराशे
वाणि देहि मम पाण्यवलम्बम् ॥ २५ ॥

कामलोभमदपूरितचेतः-
प्राणिदूरनिजपादपयोजे ।
कामनिर्मथनदक्षसगर्भ्यं
वाणि देहि मम पाण्यवलम्बम् ॥ २६ ॥

अङ्गयष्टिरुचिनिर्जितभर्मे
कुम्भिकुम्भपरिपन्थिकुचाढ्ये ।
भृङ्गनीलचिकुरे तनुमध्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २७ ॥

स्वाङ्घ्रिसेवनसमागतकाष्ठा-
कान्तदारकरमार्दितपादे ।
स्वामिनि त्रिजगतां धृतवीणे
वाणि देहि मम पाण्यवलम्बम् ॥ २८ ॥

नीलनागनिवहा विविशुर्य-
द्वेणिकां मुहुरवेक्ष्य बिलानि ।
लज्जयाशु विधिभामिनि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ २९ ॥

शान्तिदान्तिविरतिप्रमुखा मां
मोहकोपमुखरोगविशीर्णम् ।
वीक्ष्य यान्ति तरसा बहुदूरं
वाणि देहि मम पाण्यवलम्बम् ॥ ३० ॥

काकलोकसदृशः पिकलोकः
केकिजालमपि शोकिनितान्तम् ।
यद्वचः श्रवणतः खलु सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३१ ॥

राजराजपदवीं क्षणमात्रा-
द्याति यत्पदसरोरुहनत्या ।
दीनराडपि जनो भुवि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३२ ॥

